ISSN: 2583-3200 | Vol. 1, Issue. 1; 2021 | Frequency: Annual

International Journal of Innovations in Liberal Arts

# उपसर्गेषु आत्मनेपदपरस्मैपदत्वम् : कर्माधारितभाषासिद्धान्तविश्लेषणम्

वि.सुब्रह्मण्यम्, उपनिदेशकः, संस्कृतपरिषद्, उस्मानियाविश्वविद्यालयः, हैदराबाद्
अपि च
श्री चिलुकूरि भुवनेश्वरः, उस्मानियाविश्वविद्यालयः, हैदराबाद्

Received: SEP. 14, 2021 | Accepted: DEC. 18, 2021 | Published: JAN. 01, 2021

## शोधपत्रहृदयम् (Abstract)

*प्रादयः क्रियायोगे उपसर्गसंज्ञां प्राप्नुवन्ति। उपसर्गत्वं प्राप्य धातोः अर्थविपरिणामे हेतवः भवन्ति। उक्तं च*

*उपसर्गेण धात्वर्थो बलादन्यत्र नीयते।*
*प्राहार-आहार-संहार-विहार-परिहारवत् ॥*
*अपि च उपसर्गाः उपसर्गत्वं प्राप्य त्रेधा गतिं प्राप्नुवन्ति।*
*धात्वर्थं बाधते कश्चित् कश्चित्तमनुवर्तते।*
*तमेव विशिनष्ट्यन्य उपसर्गाणां गतिस्त्रिधा ॥ (दुर्गादासः)*

*इत्थम् उपसर्गयोगेन धातोः बहुविधाः परिणामाः सञ्जायन्ते। तेषु आत्मनेपदित्वं परस्मैपदित्वमाधारीकृत्य शोधपत्रमुखेन चर्चा क्रियते।*

## I. परिचयः

**प्रप्रत्यपिपरापोपपर्यन्ववविसंस्वति ।**
**निर्न्युदधिदुरभ्याङ् उपसर्गाश्च विंशतिः॥**

**प्र, परा, अप, सम्, अनु, अव, निस्, निर्, दुस्, दुर्, वि, आङ्, नि, अधि, अपि, अति, सु, उत्, अभि, प्रति, परि, उप** इत्येते प्रादयः। प्रादिर्येषां ते प्रादयः। प्रादीनां क्रियायोगे सति उपसर्गेति संज्ञा विहिता उपसर्गाः क्रियायोगे (1.4.58) इत्यनेन सूत्रेण। तेषाम् अर्थाः इत्थम् उच्यन्ते।

- **अति** - excessive, surpassing, over, beyond
- **अधि** - above, additional, upon
- **अनु** - after, behind, along, near, with, orderly

- **अप** - away, off, back, down, negation, bad, wrong
- **अपि** - placing over, uniting, proximity, in addition to
- **अभि** - intensive, over, towards, on, upon
- **अव** - down, off, away
- **आ** - towards, near, opposite, limit, diminutive
- **उत्, उद्** - up, upwards, off, away, out, out of, over
- **उप** - near, inferior, subordinate, towards, under, on
- **दुस्, दुर्, दुः** - bad, hard, difficult, inferior
- **नि** - negation, in, into, down, back
- **निस्, निर्, निः** - negative, out, away, forth, intensive
- **परा** - away, off, aside
- **परि** - round, about, fully
- **प्र** - forth, on, onwards, away, forward, very, excessive, great
- **प्रति** - towards, in opposition to, against, upon, in return back, likeness, every
- **वि** - without, apart, away, opposite, intensive, different
- **सम्** - with, together, completely
- **सु** - good, well, easy

उपसर्गाः 22 सन्ति। परन्तु अत्र श्लोके 20 एव उक्ताः। तत्र कारणं निस्, निर् इत्येतयोः, दुस् दुर् इत्येतयोश्च एकत्वेन ग्रहणत्वात्। उपसर्गयोगे धातोः विपरिणामविषये अस्मिन् शोधपत्रे प्रस्तूयते।

### 1.1 उद्देश्यः, लक्ष्यञ्च

- शोधपत्रस्यास्य उद्देश्यस्तु उपसर्गयोगे विशेषरूपाणां विश्लेषणम्।
- लक्ष्यन्तु उपसर्गयोगेन परस्मैपदि-आत्मनेपदिरूपाणां विश्लेषणम्।

### 1.2 वस्तुजालः पद्धतिश्च

पाणिनेः सूत्राणि, काशिकां, भट्टोजिदीक्षितस्य सिद्धान्तकौमुद्याः व्याख्यानं, कौमुद्याः तत्वबोधिनीबालमनोरमाव्याख्याः, चारुदेव शास्त्रिणा विरचितम् उपसर्गार्थयन्द्रिकां, संस्कृतवाङ्ग्ये उपलभ्यमानान् विविधान् ग्रन्थान्, कर्माधारितभाषासिद्धान्तम् च अनुसृत्य शोधकार्यस्यास्य विश्लेषणं क्रियते।

### 1.3 शोधसमस्यायाः प्रश्नः

- उपसर्गयोगे उभयपदि-परस्मैपदि-आत्मनेपदिषु वैशिष्टमस्ति किम्?
- यद्यस्ति सर्हि प्रयोगाः उपलभ्यन्ते वा?

### 1.4 परिशोधनायाः लक्ष्यप्रतिपादनम्

- उपसर्गयोगेन धातोः अर्थविपरिणामः भवतीति स्पष्टम्। क्वचिच्च सकर्मकोऽपि धातुः अकर्मको भवति। अकर्मकोऽपि सकर्मकः भवतीति उदाहरणैः स्पुटं भवति।

- प्रकृते तु उपसर्गयोगे परस्मैपदिनः आत्मनेपदित्वेन, आत्मनेपदिनः परस्मैपदित्वेन, क्वचिच्च उभयपदिनः केवलं परस्मैपदित्वेन क्वचिच्च आत्मनेपदित्वेन दरीदृश्यन्ते। तेषां प्रस्तुतिः अत्र क्रियते।

## 1.5 शोधपरिधिः एवम् अवधिः

- अस्मिन् शोधपत्रे केवलं केषुचित् धातुषु उपसर्गयोगे सति परस्मैपदिनः आत्मनेपदित्वेन, आत्मनेपदिनः परस्मैपदित्वेन, क्वचिच्च उभयपदिनः केवलं परस्मैपदित्वेन क्वचिच्च आत्मनेपदित्वेन भवन्तीति दर्श्यते।
- सकर्मक-अकर्मकपरिवर्तनविषये चर्चा न क्रियते।
- उपरसर्गाः द्योतकाः अपि च वाचकाः भवन्तीति निरुक्तकारस्य अभिमतम्। तस्मिन् विषये चर्चा न क्रियते।
- धात्वर्थपरिवर्तनविषये चर्चा न क्रियते।

## 1.6 परिशोधनायाः प्रामुख्यम्

इतः पूर्वं विहितशोधप्राकरेषु इत्थं विभागशः परस्मैपदिनः आत्मनेपदित्वेन, आत्मनेपदिनः परस्मैपदित्वेन, क्वचिच्च उभयपदिनः केवलं परस्मैपदित्वेन क्वचिच्च आत्मनेपदित्वेन भवन्तीति सोदाहरणं न निरूपितम्। अनेन शोधपत्रमुखेन पृथक्तया निरूप्यते।

# II. साहित्यानुशीलनम्

## 2.1 पूर्वशोधनसाहित्यानुशीलम्

- एते विचाराः काशिकादिषु ग्रन्थेषु प्रस्तुताः।
- सिद्धान्तकौमुदीकारः सूत्राणां व्याख्यानसन्दर्भे पृथक् परस्मैपदिप्रकरणम्, आत्मनेपदिप्रकरणम् इत्यत्र सोदाहरणं विमर्शं कृतवान्।
- चारुदेवशास्त्रिणाम् उपसर्गार्थचन्द्रिकाख्ये ग्रन्थे उदाहरणानि उपलभ्यन्ते।

## 2.2 प्रस्तुतशोधसाहित्यानुशीलनम्

न केनापि अस्मिन् विषये सहजतया प्रस्तुतम्। कर्माधारितभाषासिद्धान्ते न केनापि प्रस्तुतमित्यतः अनेन शोधपत्रमुखेन प्रयत्नो विधीयते।

## 2.3 शोधकार्यान्तरालः

कर्मकारकविषये कर्माधारितसिद्धान्तरीत्या न केनापि प्रेरणा कृता।

## 2.4 परिशोधनपरिष्कारप्रतिपादनम्

अस्मिन् शोधपत्रे कर्माधारितभाषासिद्धान्तरीत्या उपसर्गयोगे परस्मैपदि-आत्मनेपदित्वविचारः क्रियते।

# III. संस्कृते कर्मकारकम्: कर्माधारितभाषासिद्धन्तविश्लेषणम्

## 3.1 विषयसङ्ग्रहः

पाणिनेः सूत्रेभ्यः, काशिकायाः, भट्टोजिदीक्षितस्य सिद्धान्तकौमुद्याः व्याख्यानात्, कौमुद्याः तत्वबोधिनीबालमनोरमाव्याख्याभ्यः, चारुदेशशास्त्रिणाम् उपसर्गार्थचन्द्रिकायाः, संस्कृतवाङ्मये रचितेभ्यः विविधग्रन्थेभ्यः विषयस्य सङ्ग्रहः कृतः।

## 3.2 स्वरूपक्रमः निर्मितिक्रमश्च

1. उभयपदिनः धातवः आत्मनेपदित्वेन

2. उभयपदिनः धातवः परस्मैपदित्वेन
3. परस्मैपदिनः धातवः आत्मनेपदित्वेन
4. आत्मनेपदिनः धातवः परस्मैपदित्वेन

शोधपत्रेऽस्मिन् एते अंशाः सोदाहरणं विवृताः।

प्र-परा-अप-सम्-अनु-अव-निस्-निर्-दुस्-दुर्-वि-आङ्-नि-अधि-अपि-अति-सु-उत्-अभि-प्रति-परि-उप इत्येते प्रादयः। प्रादिर्येषां ते प्रादयः। प्रादीनां क्रियायोगे सति उपसर्गेति संज्ञा विहिता उपसर्गाः क्रियायोगे (1.4.58) इत्यनेन।

उपसर्गाणां क्रियया सह संयोजनेन वाक्ये सौष्ठवं चमत्काञ्च आयाति। साधारणधातूनां प्रयोगापेक्षया सोपर्गधातूनां प्रयोगे सति भाषा परिष्कृता प्रौढा इव प्रतीयते। अयमुपसर्गः अस्मिन् विधीयते इति नियमः नास्ति। अतः सर्वेऽपि उपसर्गाः सर्वेभ्यः धातुभ्यः विहिताः। अपि च अस्योपसर्गस्य अयमर्थः इत्यपि निश्चितं नास्ति। क्वचित् उपसर्गवृत्तिरिति ग्रन्थे के उपसर्गाः कस्मिन् अर्थे प्रयुञ्जन्ते इति सोदाहरणं विवृतमस्ति। अनिश्चितार्थकस्य उपसर्गस्य युगे सति धातोः वास्तविकः यः अर्थः सः विपरिणतः भवतीति अयं विशेषः। दुर्गादासेन मुग्धबोधटीकायाम् उक्तम् -

उपसर्गेण धात्वर्थो बलादन्यत्र नीयते।
नीहाराहारसंहारप्रतीहारप्रहारवत्।। इति।

भौवादिकः हृञ् धातुः हरणार्थकः। आङ् योगे आहरतीति, वि योगे विहरतीति, सं योगे संहरतीति रीत्या भिन्नभिन्नधातूनां भिन्नभिन्नोपसर्गाणां योगे भिन्नर्थता एव परिदृश्यते। इतीदं सर्वं लोके परिदृश्यते इति दुर्गादासः कथयति।

अपि च, उपर्गस्य गतिः त्रिधा भवतीति। क्वचित् उपसर्गः धात्वर्थं बाधते। यथा आदत्ते, आहारः, विहारः, संहारः, परिहारः, प्रहारः, इत्यादिषु। क्वचिच्च उपसर्गः धातुम् अनुवर्तते। यथा - प्रसूते, वसति-अधिवसति, उच्यते-प्रोच्यते इत्यादिषु। क्वचिच्च धात्वर्थं विशेषेण उच्यते। यथा - गच्छति-अनुगच्छति, वदति-निर्वक्ति, करोति-परिष्करोति इत्यादिषु। उक्तञ्च

धात्वर्थं बाधते कश्चित् कश्चित्तमनुवर्तते।
तमेव विशिनष्ट्यन्य उपसर्गाणां गतिस्त्रिधा ।। (दुर्गादासः)

उपसर्गयोगे धातुः सकर्मकोऽपि अकर्मकः भवति। अकर्मकोऽपि सकर्मकः भवतिः। उदाहरणं यथा - तपसन्तापे इति धातुः सकर्मकः उदित्युपसर्गयोगे उत्तपते पाणिम् इत्यत्र अकर्मकः भवति। अपि च गम्लृ गतौ इति धातुः सकर्मकः समित्युपसर्गयोगे सङ्गतं भवतीत्यस्मिन् अर्थे सङ्गच्छते इत्यत्र अकर्मकः भवति। भूधातुः अकर्मकः। पापी दुःखमनुभवति इत्यत्र भूधातुः सकर्मकः सञ्जातः।

उपसर्गयोगेन धातवः क्वचित् आत्मनेपदिनः परस्मैपदित्वं क्वचित् परस्मैपदिनः आत्मनेपदित्वं प्राप्नुवन्ति। क्वचित् उभयपदिनः परस्मैपदित्वेन नश्चीयन्ते। क्वचिच्च आत्मनेपदित्वेन। पृथक् परस्मैपदिप्रकरणम् आत्मनेपदिप्रकरणमिति प्रकरणद्वयं सिद्धान्तकौमुद्यां दृश्येते। अष्टाध्याय्यां तावत् 1.3.12 तः 1.3.77 पर्यन्तम् आत्मनेपदिविधानसूत्राणि 1.3.78 तः 1.3.93 पर्यन्तं परस्मैपदिविधानसूत्राणि पठितानि। यद्यपि धातुपाठे आत्मनेपदि-परस्मैपदि-उभयपदिधातूनां पृथक्पाठेन स्पष्टमवगमनं कारितमेव, तेन तयोः परिज्ञानं स्पष्टमेव। तथापि एतेषां योगेन परस्मैपदि-आत्मनेपदि परिवर्तनस्य ज्ञानम् अपेक्षितम्।

तददः प्रस्तूयते।

डुकृञ् करणे इत्ययं धातुः तनादिकः सकर्मकः उभयपदी च। विभिन्नोपसर्गाणां योजनेन भिन्नार्थेषु सत्सु क्वचित्केवलं परस्मैपदित्वं क्वचित्केवलमात्मनेपदित्वमाप्नोति।

1. **अधिकुरुते-** अधिपूर्वकात् कृधातोः प्रसहनार्थे अधेः प्रसहने (१,३.३३) इत्यनेन आत्मनेपदं विवक्षते। प्रसहनम् क्षमाभिभवः अपराजयो वा। शत्रुम् **अधिकुरुते**। क्षमते इत्यर्थः। प्रसहनाभावे तु अर्थम् अधिकरोति।
2. **अनुकरोति -** अनु पूर्वे सति तु गन्धनावक्षेपणसेवनसाहसिक्यप्रतियत्नप्रकथनोपयोगेषु कृञः (१,३.३२) इत्यनेन आत्मनेपदं विहितम्। तदपवादत्वेन अनुपूर्वकात् कृधातोः अनुपराभ्यां कृञः (१,३.७९) इत्यनेन परस्मैपदं विधीयते। अनुकरणं करोतीत्यर्थः।
3. **उत्कुरुते** - उदुपसर्गात् कृधातोः गन्धनार्थे गन्धनावक्षेपणसेवनसाहसिक्यप्रतियत्नप्रकथनोपयोगेषु कृञः (१,३.३२) इत्यनेन आत्मनेपदं विवक्षते। गन्धनं प्रकारप्रयुक्तं हिंसात्मकं सूचनम्। उत्कुरुते। सूचयति इत्यर्थः। सूचनं हि प्राणवियोगानुकूलत्वात् हिंसैव इति दीक्षतः।
4. **उदाकुरुते** - उदा पूर्वकात् कृधातोः अवक्षेपणार्थे गन्धनावक्षेपणसेवनसाहसिक्यप्रतियत्नप्रकथनोपयोगेषु कृञः (१,३.३२) इत्यनेन आत्मनेपदं विवक्षते। अवक्षेपणं भर्त्सनम्। श्येनो वर्तिकामुदाकुरुते। भर्त्सयति इत्यर्थः। वर्तिका शकुनिविशेषः इति बालमनोरमा।
5. **उपकुरुते** - उपपूर्वकात् कृधातोः सेवनार्थे गन्धनावक्षेपणसेवनसाहसिक्यप्रतियत्नप्रकथनोपयोगेषु कृञः (१,३.३२) इत्यनेन आत्मनेपदं विवक्षते। सेवनम् अनुवृत्तिः। भक्तः हरिमुपकुरुते। सेवते इत्यर्थः।
6. **उपस्कुरुते** - उपपूर्वकात् कृधातोः प्रतियत्नार्थे गन्धनावक्षेपणसेवनसाहसिक्यप्रतियत्नप्रकथनोपयोगेषु कृञः (१,३.३२) इत्यनेन आत्मनेपदं विवक्षते। प्रतियत्नः सतो गुणान्तराधानम्। प्रतियत्ने एधो दकस्य उपस्कुरुते। गुणमाधत्ते इत्यर्थः। दक इति शब्दः उदकवाची। उक्तञ्च 'प्रोक्तं प्राज्ञैर्भुवनममृतं जीवनीयं दकं च' इति हलायुधः। काण्डं गुडस्य उपस्कुरुते। तस्य सतो गुणान्तराधानं करोति इत्यर्थः।
7. **पराकरोति** - गन्धनावक्षेपणसेवनसाहसिक्यप्रतियत्नप्रकथनोपयोगेषु कृञः (१,३.३२) इत्यनेन आत्मनेपदं विहितम्। तदपवादत्वेन परापूर्वकात् कृधातोः अनुपराभ्यां कृञः (१,३.७९) इत्यनेन परस्मैपदं विधीयते। पराकरोति। ता हनूमान् पराकुर्वन् (भट्टि8.50) तासां दर्शनं परिहरन् आहेत्यर्थः। अयं पर्यर्थकः वर्जने प्रयुक्तः।
8. **प्रकुरुते** - प्रोपसर्गात् कृधातोः साहसिक्य-प्रकथन-उपयोगार्थेषु गन्धनावक्षेपणसेवनसाहसिक्यप्रतियत्नप्रकथनोपयोगेषु कृञः (१,३.३२) इत्यनेन आत्मनेपदं विवक्षते। 1. साहसिक्यं साहसिकं कर्म। परदारान् प्रकुरुते। तेषु सहसा प्रवर्तते इत्यर्थः। 2.प्रकथनं प्रकर्षेण कथनम्। गाथाः प्रकुरुते। जनापवादान् प्रकुरुते। प्रकर्षेण कथयति इत्यर्थः। 3.उपयोगो धर्मादि प्रयोजनो विनियोगः। शतं सहस्रं वा प्रकुरुते। धर्मार्थं शतं सहस्रं वा विनियुङ्क्ते इत्यर्थः। स मन्त्रिणः प्रकुर्वीत प्राज्ञान्मौलान्स्थिरान् शुचीन् (याज्ञ 1.312)
9. **विकुरुते** - विपूर्वकात् कृधातोः शब्दकर्मणि वेः शब्दकर्मणः (१,३.३४) इत्यनेन आत्मनेपदं विवक्षते। स्वरान् विकुरुते। उच्चारयतीर्थः। शब्दकर्मणः अभावे तु विकरोति पयः। चित्तं विकरोति कामः।
10. **विकुरुते** - विपूर्वकात् अकर्मकादकर्मकक्रियावचनात् कृधातोः अकर्मकाच्च (१,३.३५) इत्यनेन आत्मनेपदं विधीयते। छात्रा विकुर्वते। विकारं लभते इत्यर्थः।

वद व्यक्तायां वाचि इत्ययं धातुः भ्वादिकः सकर्मकः परस्मैपदी च। विभिन्नोपसर्गाणां योजनेन भिन्नार्थेषु सत्सु क्वचित्केवलं परस्मैपदित्वं क्वचित्केवलमात्मनेपदित्वमाप्नोति।

1. **अनुवदते** -व्यक्तवाग्विषयात् अकर्मकक्रियावचनात् अनूपसर्गपूर्वकात् वदधातोः अनोरकर्मकात् (१,३.४९) इत्यनेन आत्मनेपदं विवक्षते। अनुः सादृश्ये। अनुवदते कठः कलापस्य। यथा कलापोऽधीयानो वदति तथा कठः इत्यर्थः। अनुवदते मौद्गः पैप्पलादस्य। अकर्मकस्याभावे तु पूर्वमेव यजुरुदितमनुवदति। व्यक्तवाकभावे तु अनुवदति वीणा॥
2. **अपवदते** -अपपूरवकात् वदधातोः कर्त्रभिप्राये क्रियाफले अपाद्वदः(१,३.७३) इत्यनेन आत्मनेपदं प्रवर्तते। धनकामो न्यायमपवदते। (पा.1.3.73 सूत्रे वृत्तिः) न्यायापवादेन धनमर्जयिष्यामि इति मन्यते। नृभ्योऽपवदमानस्य रावणस्य गृहे ययौ (भट्टि 8.47) क्रुध्यतोऽसूयत वेति जयमङ्गला। कर्त्रभिप्रये क्रियफले इत्येव, अपवदति (अध्यारोपापवादाभ्यां वस्तुतत्वविनिर्णयः, वेदान्ते अपवादः प्रतिवादो वा इत्यर्थः) ॥
3. **उपवदते** -उपसम्भाषण-उपमन्त्रणेत्येतयोः विशेषणे सति भासनोपसम्भाषाज्ञानयत्नविमत्युपमन्त्रणेषु वदः (१,३.४७) इत्यनेन वदतेरात्मनेपदं भवति। 1.उपसम्भाषा उपसान्त्वनम्। कर्मकरानुपवदते। उपसान्त्वयति इत्यर्थः। 2.उपमन्त्रणं रहस्युपच्छन्दनम्। कुलभार्यामुपवदते। परदारानुपवदते। उपच्छन्दतीत्यर्थः। एतेषामभावे यत्किञ्चिद्वदति इति परस्मैपदि एव॥
4. **वदते** -भासनादिषु विशेषणेषु सत्सु भासनोपसम्भाषाज्ञानयत्नविमत्युपमन्त्रणेषु वदः (१,३.४७) इत्यनेन वदतेरात्मनेपदं भवति। 1. भासनं दीप्तिः। शास्त्रे वदते। भासमानो दीप्यमानस्तत्र प्रतिपदार्थान् व्यक्तीकरोति इत्यर्थः। 2. ज्ञानं सम्यगवबोधः। शास्त्रे वदते। शास्त्रं वक्तुं जानातीत्यर्थः 3. यत्नः उत्साहः। क्षेत्रे वदते। गेहे वदति। तद्विषयमुत्साहमाविष्करोति इत्यर्थः। एतेषामभावे यत्किञ्चिद्वदति इति परस्मैपदि एव॥
5. **विवदते** -विमतीति विशेषणे सति भासनोपसम्भाषाज्ञानयत्नविमत्युपमन्त्रणेषु वदः (१,३.४७) इत्यनेन वदतेरात्मनेपदं भवति। विमतिर्नानामतिः। वेदिकायां विवदते। गेहे विवदते। विमतिपतिता विचित्रं भाषते इत्यर्थः। विमतीत्यभावे तु यत्किञ्चिद्वदति इति परस्मैपदि एव॥
6. **सम्प्रवदन्ते** -मनुष्यादीनां सम्भूयोच्चारणमिति विशेषणे सति सम्प्रपूर्वकस्य वदधातोः व्यक्तवाचां समुच्चारणे (१,३.४८) इत्यनेन आत्मनेपदं विधीयते। व्यक्तवाचां समुच्चारणं सहोच्चारणम्। सम्प्रवदन्ते ब्राह्मणाः। सम्प्रवदन्ते क्षत्रियाः। व्यक्तवाचामित्यभावे तु सम्प्रवदन्ति कुक्कुटाः। समुच्चारणाभावे तु ब्राह्मणो वदति। क्षत्रियो वदति॥

ष्ठा गतिनिवृत्तौ इत्ययं धातुः भ्वादिकः अकर्मकः परस्मैपदी च। विभिन्नोपसर्गाणां योजनेन भिन्नार्थेषु सत्सु क्वचित्केवलं परस्मैपदित्वं क्वचित्केवलमात्मनेपदित्वमाप्नोति।

1. **अवतिष्ठते** -अवपूर्वकात् स्थाधातोः समवप्रविभ्यः स्थः(१,३.२२) इत्यनेन आत्मनेपदं विवक्षते। अवतिष्ठते।
2. **आतिष्ठते** -आ पूर्वकात् स्थाधातोः 'आङः प्रतिज्ञायामुपुसङ्ख्यानम्' (वा.912) इत्यनेन आत्मनेपदं विवक्षते। शब्दं नित्यमातिष्ठते। नित्यत्वेन प्रतिजानीते इत्यर्थः। आगमौ गुणवृद्धी आतिष्ठेते।
3. **उत्तिष्ठते** -उदुपसर्गात् अनूर्ध्वकर्मण्यर्थे स्थाधातोः उदोऽनूर्ध्वकर्मणि (१,३.२४) इत्यनेन आत्मनेपदं विधीयते। ऊर्ध्वदेशसंयोगानुकूला क्रिया ऊर्ध्वकर्म। तद्भिन्ने कर्मणि इत्यर्थः। गेहे उत्तिष्ठते। कुटुम्बे उत्तिष्ठते। तदर्थं यतते इत्यर्थः। मुक्तावुत्तिष्ठते। गुरूपगमनादिना यतते इत्यर्थः। ऊर्ध्वकर्मणि तु पीठादुत्तिष्ठति। उत्पततीत्यर्थः। अपि च आसनादुत्तिष्ठति। 'ईहायामेव' (वा.913) इत्यनेन वार्तिकेन ईहायाम् आत्मनेपदं विवक्षते। इच्छापूर्विका चेष्टा ईहा। तेन ग्रामाच्छतमुत्तिष्ठति इत्यत्र न। ग्रामात् शतम् उत्पद्यते इत्यर्थः।
4. **उपतिष्ठते** -उपपूर्वकात् मन्त्रकरणार्थे स्थाधातोः उपान्मन्त्रकरणे (१,३.२५) इत्यनेन आत्मनेपदं विधीयते। ऐन्द्र्या गार्हपत्यमुपतिष्ठते। ऐन्द्र्य्या ऋचा अग्निम् उपयातीत्यर्थः। आग्नेय्या

आग्नीध्रमुपतिष्ठते। आग्नेय्या ऋचा आग्नीध्राख्यमण्डपविशेषमुपेत्य तिष्ठतीत्यर्थः। मन्त्रकरणाभावे तु भर्तारमुपतिष्ठति यौवनेन इति आत्मनेपदं न। 'उपाद्देवपूजासङ्गतिकरणमित्रकरणपथिष्विति वाच्यम्' (वा.914) इति वार्तिकम्। देवपूजायाम् - आदित्यमुपतिष्ठते। आदित्यम् अभिमुखीभूयावस्थितिपूर्वकस्तुत्यादिभिः पूजयतीत्यर्थः। सङ्गतिकरणे - रथिकामुपतिष्ठते। सङ्गतिकरणमुपश्लेषः। गङ्गा-यमुनामुपतिष्ठते। मित्रकरणे - महामात्रामुपतिष्ठते। मित्रकरणं तु विनाप्युपश्लेषेण मैत्रीसम्बन्धः। पथि - अयं पन्थाः नगरमुपतिष्ठते। 'वा लिप्सायामिति वक्तव्यम्' (वा.919) इति वार्तिकम्। भिक्षुको ग्राममुपतिष्ठते, उपतिष्ठति इति वा। आश्रित्यजीवतीत्यर्थः।

5. **उपतिष्ठते** -उपपूर्वकात् अकर्मकक्रियावचनात् स्थाधातोः अकर्मकाच्च (१,३.२६) इत्यनेन आत्मनेपदं विधीयते। भोजनकाल उपतिष्ठते। सन्निहितो भवतीत्यर्थः। यावद्भुक्तमुपतिष्ठते। यावदोदनुमुपतिष्ठते। भोजने भोजने सन्निधीयते इत्यर्थः। अकर्मकाभावे तु राजानम् उपतिष्ठति इत्येव।
6. **तिष्ठते** -उपसर्गरहितात् प्रकाशनार्थे स्थेयार्थे स्थाधातोः प्रकाशनस्थेयाख्ययोश्च (१,३.२३) इत्यनेन आत्मनेपदं विधीयते। स्वाभिप्रायकथनं प्रकाशनम्। 1. गोपी कृष्णाय तिष्ठते। आशयं प्रकाशयतीत्यर्थः। विद्या तिष्ठते छात्राय (विद्या छात्रेण स्वस्वरूपं प्रकाशयतीत्यर्थः) भार्या तिष्ठते पत्ये (पतिव्रता स्त्री पत्ये स्वस्वरूपं दर्शयतीत्यर्थः)। 2. स्थेयस्य आख्या स्थेयाख्या। तिष्ठत्यस्मिन्निति स्थेयः। विवादपदनिर्णेता लोके स्थेयः इति प्रसिद्धः। तस्य प्रतिपत्त्यर्थमाख्याग्रहणम्। कर्णादिषु संशय्य तिष्ठते। कर्णादीन् निर्णेतृत्वेन आश्रयतीत्यर्थः। त्वयि तिष्ठते। (निर्यायकत्वेन त्वयि आश्रितः इत्यर्थः), मयि तिष्ठते।
7. **प्रतिष्ठते** - प्रपूर्वकात् स्थाधातोः समवप्रविभ्यः स्थः(१,३.२२) इत्यनेन आत्मनेपदं विवक्षते। प्रतिष्ठते। कर्मणि प्रवृत्तो भवतु इत्याह। स्थितिमत्यो भवन्तीत्यर्थः। भिक्षाभुजश्च ये केचित्परिव्राड्ब्रह्मचारिणः। तेप्यत्रैव प्रतिष्ठन्ते गार्हस्थ्यं तेन वै परम् (वि.पु.3.9.11)
8. **वितिष्ठते** - व्युपसर्गात् स्थाधातोः समवप्रविभ्यः स्थः(१,३.२२) इत्यनेन आत्मनेपदं विवक्षते। वितिष्ठते।
9. **सन्तिष्ठते** - समुपसर्गात् स्थाधातोः समवप्रविभ्यः स्थः(१,३.२२) इत्यनेन आत्मनेपदं विवक्षते। सन्तिष्ठते। समाप्तं भवतीत्यर्थः। सद्यः सन्तिष्ठते यज्ञः (मनु 5.97)। न तत्संस्थास्यते कार्यं दक्षेणोरीकृतं त्वया (भट्टिः8.11)

रमु क्रीडायामिति इत्ययं धातुः भ्वादिकः अकर्मकः आत्मनेपदी च। विभिन्नोपसर्गाणां योजनेन भिन्नार्थेषु सत्सु क्वचित्केवलं परस्मैपदित्वं क्वचित्केवलमात्मनेपदित्वमाप्नोति।

1. **आरमति** - आङ्पूर्वकात् रमधातोः अनुदात्तेत्त्वदात्मनेपदे प्राप्ते व्याङ्परिभ्यो रमः (१,३.८३) इत्यनेन प्रस्मैपदं विधीयते। आरमति। आङः अभावे अभिरमते इत्यत्र आत्मनेपदम् अस्त्येव ।
2. **उपरमति** - उपपूर्वकात् रमधातोः अनुदात्तेत्त्वदात्मनेपदे प्राप्ते उपाच्च (१,३.८४) इत्यनेन प्रस्मैपदं विधीयते। देवदत्तमुपरमति। यज्ञदत्तमुपरमति। उपाभावे अभिरमते इत्यत्र आत्मनेपदम् अस्त्येव॥
3. **उपरमते** - उपपूर्वकात् रमधातोः उपाच्च (१,३.८४) इत्यनेन नित्ये प्रस्मैपदे प्राप्ते विभाषाऽकर्मकात् (१,३.८५) इत्यनेन अकर्मकाद्विभाषा परस्मैपदं भवति। यावद्भुक्तमौपरमति, यावद्भुक्तमुपरमते। निवर्तते इत्यर्थः॥

4. **परिरमतिं** - परिपूर्वकात् रमधातोः अनुदात्तेत्त्वदात्मनेपदे प्राप्ते व्याङ्परिभ्यो रमः (१,३.८३) इत्यनेन प्रस्मैपदं विधीयते। परिरमति। पर्यभावे अभिरमते इत्यत्र आत्मनेपदम् अस्त्येव ॥
5. **विरमतिं** -विपूर्वकात् रमधातोः अनुदात्तेत्त्वदात्मनेपदे प्राप्ते व्याङ्परिभ्यो रमः (१,३.८३) इत्यनेन प्रस्मैपदं विधीयते। विरमति। वि अभावे अभिरमते इत्यत्र आत्मनेपदम् अस्त्येव।

क्रीडृ विहारे इत्ययं धातुः भ्वादिकः अकर्मकः परस्मैपदी च।

1. **अनुक्रीडते** -अनु पूर्वकात् क्रीडधातोः क्रीडोऽनुसम्परिभ्यश्च (१,३.२१) इत्यनेन सूत्रेण आत्मनेपदं विधीयते। अनुक्रीडते। 'अनोः कर्मप्रवचनीयात् न' इति नियमेन माणवकम् अनुक्रीडति इत्येव। अत्र 'तृतीयार्थे' इति कर्मप्रवचनीय संज्ञा।
2. **आक्रीडते** -आङ् पूर्वकात् क्रीडधातोः 'आङः खल्वपि' इत्यनेन आत्मनेपदं विधीयते। आक्रीडते।
3. **परिक्रीडते** - परि पूर्वकात् क्रीडधातोः क्रीडोऽनुसंपरिभ्यश्च(१,३.२१) इत्यनेन सूत्रेण आत्मनेपदं विधीयते। परिक्रीडते।
4. **सङ्क्रीडते** - समुपसर्गपूर्वकात् क्रीडधातोः क्रीडोऽनुसंपरिभ्यश्च (१,३.२१) इत्यनेन सूत्रेण आत्मनेपदं विधीयते। सङ्क्रीडते। 'समोऽकूजने' (वा. 904) इति वार्तिकम्। समः परस्मात् अकूजने विद्यमानात् क्रीडेरात्मनेपदमित्यर्थः। तस्य सङ्क्रीडमानस्य महादेवस्य धीमतः। शितिकण्ठस्य देवस्य दिव्यं वर्षशतं गतम्। (रा 1.36.6)। रममाणस्येत्यर्थः। कूजने तु सङ्क्रीडति चक्रमिति। चक्रं कूजतीत्यर्थः। सङ्क्रीडन्ति शकटानि (पा 1.3.21 सूत्रवृत्तौ) कूजन्तीत्यर्थः।

क्रमु पादविक्षेपे इत्ययं धातुः भ्वादिकः सकर्मकः परस्मैपदी च।

1. **आक्रमते** -आङ् पूर्वकात् क्रमधातोः आङ उद्गमने (१,३.४०) इत्यनेन आत्मनेपदं भवति। आक्रमते आदित्यः। उदयते इत्यर्थः। आक्रमते चन्द्रमाः। आक्रमन्ते ज्योतींषि। उदयन्ते इत्यर्थः। उद्गमनाभावे तु आक्रामति माणवकः। 'ज्योतिरुद्गमने इति वाच्यम्' (वा 921) इति वार्तिकेन प्रकाशनाभावे आक्रमति धूमो हर्म्यतलात्॥
2. **विक्रमते** -विपूर्वकात् क्रमधातोः पादविहरणार्थे वेः पादविहरणे (१,३.४१) इत्यनेन आत्मनेपदं भवति। विहरणं विक्षेपः। अश्वादीनां गतिविशेषो विक्रमणमुच्यते। सुष्ठु विक्रमते वाजी। साधु विक्रमते वाजी। पादविहरणाभावे तु विक्रामतिं सन्धिः। द्विधा भवति, स्फुटतीत्यर्थः॥
3. **क्रमते -** वृत्याद्यर्थेषु क्रमधातोः वृत्तिसर्गतायनेषु क्रमः (१,३.३८) इत्यनेन आत्मनेपदं भवति। 1.वृत्तिरप्रतिबन्धः। ऋचि क्रमते बुद्धिः। न प्रतिहन्यते इत्यर्थः। 2. सर्ग उत्साहः। व्याकरणाध्ययनाय क्रमते बुद्धिः। उत्सहते इत्यर्थः। 3. तायनं स्फीतता। क्रमन्तेऽस्मिन् शास्त्राणि। स्फीतानि भवन्तीत्यर्थः। वृत्याद्यभावे तु अपक्रामति॥
4. **उपक्रमते** - वृत्तिसर्गतायनेषु अर्थेषु उपपूर्वकात् क्रमधातोः उपपराभ्याम् (१,३.३९) इत्यनेन आत्मनेपदं भवति। उपक्रमते। उपपराभ्यामभावे तु सङ्क्रामति। वृत्याद्यभावे तु उपक्रामति।
5. **उपक्रमते** -उपपूर्वकात् क्रमधातोः प्रोपाभ्यां समर्थाभ्याम् (१,३.४२) इत्यनेन आत्मनेपदं विधीयते। समर्थौ तुल्यार्थौ। उपक्रमते भोक्तुम्। समर्थाभ्यामित्यभावे तु अपरेध्युः उपक्रामति इत्येव। आगच्छति इत्यर्थः।
6. **पराक्रमते** - वृत्तिसर्गतायनेषु अर्थेषु परापूर्वकात् क्रमधातोः उपपराभ्याम् (१,३.३९) इत्यनेन आत्मनेपदं भवति। पराक्रमते। गाण्डीवमुक्ता हि यथा पुरा मे पराक्रमन्ते न शराः किराते (कि

16.18)। अप्रतिबन्धेन न पतन्तीत्यर्थः। उपपराभ्यामभावे तु सङ्क्रामति। वृत्याद्यभावे तु पराक्रामति।

क्षिप प्रेरणे इत्ययं धातुः तुदादिकः सकर्मकः उभयपदी च।

1. **अतिक्षिपति** - अतिपूर्वकात् क्षिपधातोः अभिप्रत्यतिभ्यः क्षिपः (१,३.८०) इत्यनेन कर्त्रभिप्रायक्रियाफलविवक्षायामात्मनेपदे प्राप्ते परस्मैपदं विधीयते। अतिक्षिपति। अतीत्यस्याभावे आक्षिपते इति आत्मनेपदरूपम्।
2. **अभिक्षिपति** - अभिपूर्वकात् क्षिपधातोः अभिप्रत्यतिभ्यः क्षिपः (१,३.८०) इत्यनेन कर्त्रभिप्रायक्रियाफलविवक्षायामात्मनेपदे प्राप्ते परस्मैपदं विधीयते। अभिक्षिपति। अभीत्यस्याभावे आक्षिपते इति आत्मनेपदरूपम्।
3. **प्रतिक्षिपति** - प्रतिपूर्वकात् क्षिपधातोः अभिप्रत्यतिभ्यः क्षिपः (१,३.८०) इत्यनेन कर्त्रभिप्रायक्रियाफलविवक्षायामात्मनेपदे प्राप्ते परस्मैपदं विधीयते। प्रतिक्षिपति। प्रतीत्यस्याभावे आक्षिपते इति आत्मनेपदरूपम्।

ज्ञा अवबोधने इत्ययं धातुः क्र्यादिकः सकर्मकः परस्मैपदी च।

1. **अपजानीते** -अपपूर्वकात् अपह्नवि ज्ञाधातोः अपह्नवे ज्ञः (१,३.४४) इत्यनेन आत्मनेपदं विवक्षते। अपह्नवोऽअपलापः। शतं सहस्रं वा अपजानीते। अपलपतीत्यर्थः। आत्मानम् अपजानानः शशमात्रोऽनयद् दिनम् (भट्टिः 8.26)। गूहमानः, स्वरूपमाच्छादयमानः इत्यर्थः। अपह्नव ाभावे तु न त्वं किञ्चदपि जानासि इत्येव॥
2. **जानीते** -अनुपसर्गकात् अकर्मकक्रियावचनात् ज्ञाधातोः अकर्मकाच्च (१,३.४५) इत्यनेन आत्मनेपदं विवक्षते। सर्पिशो जानीते। मधुनो जानीते। सर्पिश ा मधुना उपायेन प्रवर्तते इत्यर्थः। अकर्मकाभावे तु स्वरेण पुत्रं जानाति॥
3. **प्रतिजानीते** -अनाध्यान ार्थे प्रतिपूर्वकात् ज्ञाधातोः समप्रतिभ्यामनाध्याने (१,३.४६) इत्यनेन आत्मनेपदं विधीयते। आध्यानम् उत्कण्ठापूर्वकं स्मरणम्। शतं सहस्रं वा प्रतिजानीते। अङ्गीकरोतीत्यर्थः। अनाध्यान ाभावे तु मातुः परिजानाति। पितुः परिजानाति। उत्कण्ठते इत्यर्थः॥

डुक्रीञ् द्रव्यविनिमये इत्ययं धातुः तनादिकः सकर्मकः उभयपदी च।

1. **अवक्रीणीते** - अव योगे क्रीञ् धातोः परिव्यवेभ्यः क्रियः (१,३.१८) इत्यनेन आत्मनेपदं विधीयते। तण्डुलम् अवक्रीणीते। पर्यादिषु उपसर्गेषु एव आत्मनेपदम्। न तु अन्यत्र। बहु विक्रीणाति वनम्।
2. **परिक्रीणीते** -परि योगे क्रीञ् धातोः परिव्यवेभ्यः क्रियः (१,३.१८) इत्यनेन आत्मनेपदं विधीयते। वस्त्रं परिक्रीणीते। पर्यादिषु उपसर्गेषु एव आत्मनेपदम्। न तु अन्यत्र। बहु विक्रीणाति वनम्।
3. **विक्रीणीते** - वि-उपसर्गयोगे क्रीञ् धातोः परिव्यवेभ्यः क्रियः (१,३.१८) इत्यनेन आत्मनेपदं विधीयते। पुस्तकं विक्रीणीते। पर्यादिषु उपसर्गेषु एव आत्मनेपदम्। न तु अन्यत्र। बहु विक्रीणाति वनम्।

ह्वेञ् स्पर्धायां शब्दे च इत्ययं धातुः भ्वादिकः स्पर्धायामकर्मकः शब्दार्थे सकर्मकः उभयपदी च।

1. **आह्वयते** - आङ्पूर्वकात् ह्वेञ् धातोः स्पर्धायामाङः (१,३.३१) इत्यनेन आत्मनेपदं भवति। स्पर्धा सङ्घर्षः, पराभिभवेच्छा। मल्लो मल्लमाह्वयते। छात्रश्छात्रमाह्वयते। स्पर्धमानः तस्याह्वानं करोतीत्यर्थः। कृष्णश्चाणूरमाह्वयते। स्पर्धाभिन्ने तु गामाह्वयति गोपालः। पिता पुत्रमाह्वयति।
2. **उपह्वयते** - उपपूर्वकात् ह्वेञ् धातोः निसमुपविभ्यो ह्वः(१,३.३०) इत्यनेन आत्मनेपदं भवति। उपह्वयते।
3. **निह्वयते** -निपूर्वकात् ह्वेञ् धातोः निसमुपविभ्यो ह्वः(१,३.३०) इत्यनेन आत्मनेपदं भवति। निह्वयते।

4. **विह्वयते** - विपूर्वकात् ह्वेञ् धातोः निसमुपविभ्यो ह्वः(१,३.३०) इत्यनेन आत्मनेपदं भवति। विह्वयते।
5. **संह्वयते** - समुपसर्गपूर्वकात् ह्वेञ् धातोः निसमुपविभ्यो ह्वः(१,३.३०) इत्यनेन आत्मनेपदं भवति। संह्वयते।

विश प्रवेशने इत्ययं धातुः तुदादिकः सकर्मकः परस्मैपदी च।

1. **आविशति** -नेर्विशः (१,३.१७) इत्यनेन आत्मनेपदमुक्तम्। ततः अन्यत्र आङ्पूर्वकात् विशधातोः शेषात्कर्तरि परस्मैपदम् (१,३.७८) इत्यनेन परस्मैपदं विधीयते। देहे आविशति।
2. **निविशते** - नेर्विशः (१,३.१७) इत्यनेन शेषात्कर्तरि परस्मैपदम् (१,३.७८) इति परस्मैपदे प्राप्ते नि-उपसर्गात् पूर्वस्य विशधातोः आत्मनेपदं विधीयते। निवशते सन्मार्गम्। तदभावे प्रविशति गेहम्। उपसर्गस्य अभावे तु मधुनि विशन्ति भ्रमरा इत्येव।
3. **प्रविशति** -नेर्विशः (१,३.१७) इत्यनेन आत्मनेपदमुक्तम्। ततः अन्यत्र विपूर्वकात् विशधातोः शेषात्कर्तरि परस्मैपदम् (१,३.७८) इत्यनेन परस्मैपदं विधीयते। प्रविशति गेहम्। देवरं प्रविशेत् कन्या तप्येद्वापि तपः पुनः। देवरमाश्रयेत्। पत्नी द्रुपदराजस्य द्रुपदं प्रविवेश ह। द्रुपदेन सह सम्बभूवेत्यर्थः।

यम उपरमे इत्ययं धातुः भ्वादिकः सकर्मकः परस्मैपदी च।

1. **आयच्छते** -आङ् पूर्वकात् यमधातोः अकर्मकक्रियावचनात् आङो यमहनः (१,३.२८) इत्यनेन आत्मनेपदं विधीयते। रज्जुः आयच्छते। रज्जुः दीर्घीभवतीत्यर्थः। पादम् आयच्छते। दीर्घीकरोति पादमित्यर्थः। अन्यथा आयच्छति कूपाद्रज्जुम् इत्येव। 'स्वाङ्गकर्मकाच्चेति वक्तव्यम्' (वा.916) इति वार्तिकम्। स्वमङ्गं स्वाङ्गम् इत्येवार्थः। आयच्छते पाणिम्।
2. **आयच्छते** - आङ्पूर्वकात् यमधातोः कर्त्रभिप्राये क्रियाफले कर्म समुदाङ्भ्यो यमोऽग्रन्थे (१,३.७५) आत्मनेपदं विधीयते। अग्रन्थे इति च्छेदः। वस्त्रमायच्छते। कण्ठादौ निबध्नातीत्यर्थः।
3. **उद्यच्छते** -उत्पूर्वकात् यमधातोः कर्त्रभिप्राये क्रियाफले कर्म समुदाङ्भ्यो यमोऽग्रन्थे (१,३.७५) आत्मनेपदं विधीयते। अग्रन्थे इति च्छेदः। भारमुद्यच्छते। उद्गृह्णातीत्यर्थः।
4. **उपयच्छते** - उपपूर्वकात् विवाहेऽर्थे दाधातोः उपाद्यमः स्वकरणे (१,३.५६) इत्यनेन आत्मनेपदं विधीयते। पाणिग्रहणविशिष्टमिह स्वकरणं गृह्यते, न स्वकरणमात्रम्। अस्वस्य स्वस्य करणं स्वकरणम्। अन्यदीयां कन्यां भार्यात्वेन परिगृह्णातीत्यर्थः। भार्यामुपयच्छते। स्वकरणाभावे तु देवदत्तो यज्ञदत्तस्य भार्यामुपयच्छति॥
5. **संयच्छते** - सम्प्रपूर्वकात् तृतीयायुक्तात् दाधातोः दाणश्च सा चेच्चतुर्थ्यर्थे (१,३.५५) इत्यनेन आत्मनेपदं विधीयते। 'अशिष्टव्यवहारे चतुर्थ्यर्थे तृतीया'। दास्या संयच्छते कामुकः। यो कामुकः दास्या सह भुञ्जानस्तया दत्तं स्वयं भुङ्क्ते स्वयं च तस्यै ददातीत्यर्थः। वृषल्या संयच्छते। चतुर्थ्यर्थाभावे तु पाणिना संयच्छति। संयच्छामि हयानेष युध्यतो वै कपर्दिनः (कर्णभारम् 34.76)
6. **संयच्छते** - सम्पूर्वकात् यमधातोः कर्त्रभिप्राये क्रियाफले कर्म समुदाङ्भ्यो यमोऽग्रन्थे (१,३.७५) आत्मनेपदं विधीयते। अग्रन्थे इति च्छेदः। व्रीहीन् संयच्छते। सङ्गृह्णातीत्यर्थः।

ज्ञा अवबोधने इत्ययं धातुः क्र्यादिकः सकर्मकः परस्मैपदी च।

1. **अनुजिज्ञासति** - अनुपूर्वकात् सकर्मकक्रियावचनात् सन्नन्तात् ज्ञाधातोः नानोर्ज्ञः (१,३.५८) इत्यनेन 'ज्ञाश्रु..' इत्यनेन प्राप्तमात्मनेपदं प्रतिषिध्यते। आत्मनेपदं न भवतीत्यर्थः।

पुत्रमनुजिज्ञासति। अनोः आभावे तु धर्मं जिज्ञासते। अकर्मकक्रियावचनात्तु 'पूर्ववत्सनः (१,३.६२)' इत्यनेन आत्मनेपदम् अस्त्येव। औषधमनुजिज्ञासते। औषधेन प्रवर्तितुमिच्छतीत्यर्थः।

2. **जिज्ञासते** - सन्नन्तात् ज्ञाधातोः ज्ञाश्रुस्मृदृशां सनः (१,३.५७) इत्यनेन आत्मनेपदं विवक्षते। धर्मं जिज्ञासते। ज्ञातुमिच्छतीत्यर्थः।
3. **सञ्ज्ञानीते** - अनाध्यानार्थे समुपसर्गकात् ज्ञाधातोः समप्रतिभ्यामनाध्याने (१,३.४६) इत्यनेन आत्मनेपदं विधीयते। आध्यानम् उत्कण्ठापूर्वकं स्मरणम्। शतं सहस्रं वा सञ्ज्ञानीते। देयमित्यभ्युपगच्छतीत्यर्थः अवेक्षते इति दीक्षितः। मात्रा सञ्ज्ञानीते पित्रा सञ्ज्ञानीते (पा 2.3.22 सूत्रवृत्तौ) मात्रैकमना वर्तते। पित्रैकमना वर्तते इत्यर्थः। अनाध्यानाभावे तु मातुः सञ्ज्ञानाति। पितुः सञ्ज्ञानाति। उत्कण्ठते इत्यर्थः॥

णीञ् प्रापणे इत्ययं धातुः भ्वादिकः द्विकर्मकः उभयपदी च।

1. **उन्नयते** - उत्सञ्जनेति विशेषणे सति उत् पूर्वकात् नीधातोः सम्माननोत्सञ्जनाचार्यकरणज्ञानभृतिविगणनव्ययेषु नियः (१,३.३६) इत्यनेन आत्मनेपदं विवक्षते। दण्डमुन्नयते। उत्क्षिपतीत्यर्थः। तदभावे आजां नयति ग्राममित्येव।
2. **उपनयते** - आचार्यकरणभृतीत्येतयोः विशेषणे सति उपपूर्वकात् नीधातोः सम्माननोत्सञ्जनाचार्यकरणज्ञानभृतिविगणनव्ययेषु नियः (१,३.३६) इत्यनेन आत्मनेपदं विवक्षते। 1.आचार्यकरणे - माणवकमुपनयते। विधिना आत्मसमीपं प्रापयतीत्यर्थः। उपनयनपूर्वकेणाध्यापनेन हि उपनेतरि आचार्यत्वं क्रियते। "उपनीय तु यः शिष्यं वेदमध्यापयेद् द्विजः। सकल्पं सरहस्यं च तमाचार्यं प्रचक्षते।।" इति। 2.भृतौ - कर्मकरानुपनयते। भृतिर्वेतनम्। भृतिदानेन स्वसमीपं प्रापयतीत्यर्थः। तदभावे धेनुं नयति ग्राममित्येव।
3. **नयते** -सम्माननज्ञानेत्येतयोः विशेषणे सति नीधातोः सम्माननोत्सञ्जनाचार्यकरणज्ञानभृतिविगणनव्ययेषु नियः (१,३.३६) इत्यनेन आत्मनेपदं विवक्षते। 1.सम्मानने - शास्त्रे सिद्धान्तं नयते। शास्त्रस्थं सिद्धान्तं शिष्येभ्यः प्रापयतीत्यर्थः। तेन शिष्यसम्माननं फलितम्। 2.ज्ञाने - ज्ञाने तत्त्वं नयते। निश्चिनोतीत्यर्थः। तदभावे आजां नयति ग्राममित्येव।
4. **विनयते** - विगणनव्ययेत्येतयोः विशेषणे सति विपूर्वकात् नीधातोः सम्माननोत्सञ्जनाचार्यकरणज्ञानभृतिविगणनव्ययेषु नियः (१,३.३६) इत्यनेन आत्मनेपदं विवक्षते। 1.विगणने - कर विनयते। राज्ञे देयं भागं परिशोधयतीत्यर्थः। **2.**व्यये - शतं विनयते। धर्मार्थं विनियुङ्क्ते इत्यर्थः। तदभावे आजां नयति ग्राममित्येव।
5. **विनयते** - कर्तृस्थे कर्मण्यशरीरे सति विपूर्वकात् नीधातोः कर्तृस्थे चाशरीरे कर्मणि (१,३.३७) इत्यनेन आत्मनेपदं विधीयते। कर्तुः स्वीये कर्मणि नियः यदात्मनेपदं प्राप्तं तच्छरीरावयवभिन्नम् एव स्यात्। शरीरं प्राणिकायः। तदेकदेशोऽपि शरीरम्। क्रोधं विनयते। अपगमयतीत्यर्थः। कर्तृस्थे इति अभावे देवदत्तो यज्ञदत्तस्य क्रोधं विनयति। अशरीरे इति अभावे गडुं विनयति। घाटां विनयति। कर्मणि इति अभावे बुद्ध्या विनयति। प्रज्ञया विनयति॥

वह प्रापणे इत्ययं धातुः भ्वादिकः द्विकर्मकः उभयपदी च।

6. **परिवहति** - परिपूर्वकात् मृषधातोः परेर्मृषः (१,३.८२) इत्यनेन परस्मैपदं विधीयते। प्राद्वहः (१,३.८१) इत्यस्मात् सूत्रात् वह प्रापणे इति वहतिमपि केचिदत्र अनुवर्तयन्ति अतः परिवहति इत्यपि॥

7. **प्रवहति** -प्रपूर्वकात् वहधातोः प्राद्वहः (१,३.८१) इत्यनेन कर्त्रभिप्रायक्रियाफल-विवक्षायामात्मनेपदे प्राप्ते परस्मैपदं विधीयते। प्रवहति। प्रादित्यस्याभावे आवहते ॥ इदमापः प्रवहति यत्किञ्च दुरितं मयि (ऋ10.9.8) अपनयत शोधयत इत्यर्थः।

दृशिर् प्रेक्षणे इत्ययं धातुः भ्वादिकः सकर्मकः परस्मैपदी च।

- **दिदृक्षते** -सन्नन्तात् दृश्-धातोः ज्ञाश्रुस्मृदृशां सनः (१,३.५७) इत्यनेन आत्मनेपदं विवक्षते। मातरं दिदृक्षते। द्रष्टुमिच्छतीत्यर्थः।
- **सम्पश्यते** - सम्पूर्वकात् दृश्-धातोः अकर्मकक्रियावचनात् अर्तिश्रुदृशिभ्यश्चेति वक्तव्यम् (वा 926) इत्यनेन आत्मनेपदं विधीयते। सम्पश्यते।

श्रु श्रवणे इत्ययं धातुः भ्वादिकः सकर्मकः परस्मैपदी च।

- **आशुश्रूषति** - आङ्पूर्वकात् सन्नन्तात् श्रुधातोः ज्ञाश्रुस्मृदृशां सनः (१,३.५७) इत्यनेन प्राप्तमात्मनेपदं प्रत्याङ्भ्यां श्रुवः(१,३.५९) इत्यनेन निषिध्यते। आशुश्रूषति।
- **प्रतिशुश्रूषति** - प्रतिपूर्वकात् सन्नन्तात् श्रुधातोः ज्ञाश्रुस्मृदृशां सनः (१,३.५७) इत्यनेन प्राप्तमात्मनेपदं प्रत्याङ्भ्यां श्रुवः(१,३.५९) इत्यनेन निषिध्यते। प्रतिशुश्रूषति। उपसर्गग्रहणात् कर्मप्रवचनीययुक्ते गुरुं प्रतिशुश्रूषते इति आत्मनेपदमेव।
- **शुश्रूषते** -सन्नन्तात् श्रुधातोः ज्ञाश्रुस्मृदृशां सनः (१,३.५७) इत्यनेन आत्मनेपदं विवक्षते। गुरुं शुश्रूषते। श्रोतुमिच्छतीत्यर्थः।
- **संश्रुणुते** - सम्पूर्वकात् श्रुधातोः अकर्मकक्रियावचनात् अर्तिश्रुदृशिभ्यश्चेति वक्तव्यम् (वा 926) इत्यनेन आत्मनेपदं विधीयते। संश्रुणुते। हितान्न यः संश्रुणुते स किं प्रभुः।

चर गतिभक्षणयोः इत्ययं धातुः भ्वादिकः सकर्मकः परस्मैपदी च।

- **उच्चरते** -उत्पूर्वकात् सकर्मकक्रियावचनात् चरधातोः उदश्चरः सकर्मकात् (१,३.५३) इत्यनेन आत्मनेपदं भवति। गेहमुच्चरते। कुटुम्बमुच्चरते। गुरुवचनमुच्चरते। उत्क्रम्य गच्छतीत्यर्थः। धर्ममुच्चरते। उल्लङ्घ्य गच्छतीत्यर्थः। सकर्मकाभावे तु वाष्पमुच्चरति। उपरिष्टात् गच्छतीत्यर्थः॥
- **सञ्चरते** - सम्पूर्वकात् तृतीयायुक्तात् चरधातोः संस्तृतीयायुक्तात् (१,३.५४) इत्यनेन आत्मनेपदं भवति। तृतीया इति तृतीयाविभक्तिर्गृह्यते, तया चरतेरर्थद्वारको योगः। अश्वेन सञ्चरते। द्विचक्रिकया सञ्चरते। तृतीयायुक्तादित्यभावे तु उभौ लोकौ सञ्चरसि इमं च अमुं च देवल।

ली श्लेषणे इत्ययं धातुः क्र्यादिकः सकर्मकः परस्मैपदी च।

- **आलापयते** -आङ्पूर्वकात् लीधातोः ण्यन्तात्संमानने लियः संमाननशालीनीकरणयोश्च (१,३.७०) इत्यनेन आत्मनेपदं विधीयते। सम्माननं पूजनम् जटाभिरालापयते। पूजां समधिगच्छति इत्यर्थः। सम्माननाभावे तु बालकमुल्लापयति॥
- **उल्लापयते** - उत्पूर्वकात् लीधातोः ण्यन्ताच्छालीनीकरणे च लियः संमाननशालीनीकरणयोश्च (१,३.७०) इत्यनेन आत्मनेपदं विधीयते। शालीनीकरणं न्यग्भावनम् श्येनो वर्तिकामुल्लापयते। न्यक्करोति इत्यर्थः।

युजिर् योगे इत्ययं धातुः रुधादिकः सकर्मकः उभयपदी च।

- **उपयुङ्क्ते** -उपपूर्वकात् अयज्ञपात्रप्रयोगविषयात् प्रोपाभ्यां युजेरयज्ञपात्रेषु (१,३.६४) इत्यनेन आत्मनेनपदं विधीयते। पाकक्रियायां बृहत्भाण्डं उपयुङ्क्ते।
- **प्रयुङ्क्ते** - प्रपूर्वकात् अयज्ञपात्रप्रयोगविषयात् प्रोपाभ्यां युजेरयज्ञपात्रेषु (१,३.६४) इत्यनेन आत्मनेनपदं विधीयते। पाकार्थं बृहत्भाण्डं प्रयुङ्क्ते। यज्ञादेव तद्यज्ञं प्रयुङ्क्ते (तै.ब्रा 3.2.5.6) उपादत्ते इत्यर्थः।

**अवगिरते** - गॄ निगरणे इत्ययं धातुः तुदादिकः सकर्मकः परस्मैपदी च। अवोपसर्गपूर्वकात् गॄधातोः अवाद्ग्रः (१,३.५१) इत्यनेन आत्मनेपदं विधीयते। अवगिरते। अवोपसर्गाभावे तु गिरति इति परस्मैपदिरूपमेव॥

**आदत्ते** - डुदाञ् दाने इत्ययं धातुः जुहोत्यादिकः सकर्मकः उभयपदी च। आस्यविहरणमित्युक्ते मुखविकासनमिति। आङ् पूर्वकात् ददातेः अङो दोऽनास्यविहरणे (१,३.२०) इत्यनेन अनास्य विहरणार्थे आत्मनेपदं भवति। विद्याम् आदत्ते। विद्यां गृह्णातीत्यर्थः। सूत्रे 'अविहरणे' इत्येव विवक्षितमिति बालमनोरमा। अतः आस्यविहरणाभावे विपादिकां व्याददति इति आत्मनेपदरहितं रूपम्। औषधादिना विदारयतीत्यर्थः। नदीकूलं व्याददाति भिनत्तीत्यर्थः। पराङ्गकर्मकान्न निषेधः (वा 903) इति वार्तिकम्। स्वाङ्गकर्मकात् वक्तव्यमिति। स्वमङ्गं स्वाङ्गम्। तत् कर्म यस्य सः स्वाङ्गकर्मकः। तस्मात् स्वाङ्गकर्मकात् प्रतिषेधो वक्तव्यः इत्यर्थः। तेन व्याददते पिपीलिकाः पतङ्गस्य मुखम् इति सिद्धम्।

**आरोहयते** - रुह बीजजन्मनि प्रादुर्भावे च इत्ययं धातुः भ्वादिकः अकर्मकः परस्मैपदी च। ण्यन्तात् रुहधातोः अनाध्याने णे रणौ यत्कर्म णौ चेत्स कर्ताऽनाध्याने (१,३.६७) इत्यनेन आत्मनेपदं विधीयते। आध्यानम् उत्कण्ठापूर्वकं स्मरणम्। अण्यन्तदशायाम् - आरोहन्ति हस्तिनं हस्तिपकाः, ण्यन्तदशायाम् - आरोहयते हस्ती स्वयमेव। अनाध्यानाभावे अर्थात् उत्कण्ठ्ये तु स्मरति वनगुल्मं कोकिलः। स्मरयति वनगुल्मः। स्मरयति भक्तान् हरिः।

**आहते** - हन हिंसागत्योः इत्ययं धातुः अदादिकः सकर्मकः परस्मैपदी च। आङ् पूर्वकात् हनधातोः अकर्मकक्रियावचनात् आङो यमहनः (१,३.२८) इत्यनेन आत्मनेपदं विधीयते। उदरम् आहते। अन्यथा आहन्ति वृषलं पादेन। 'स्वाङ्गकर्मकाच्चेति वक्तव्यम्' (वा.916) इति वार्तिकम्। स्वमङ्गं स्वाङ्गम् इत्येवार्थः। आहते शिरः। स्वाङ्गमित्येव अन्यथा आहन्ति शिरः परकीयम् इत्यत्र आत्मनेपदं नास्ति।

**उत्तपते** - तप सन्तापे इत्ययं धातु भ्वादिकः सकर्मकः परस्मैपदी च। उदुपसर्गकात् तपधातोः अकर्मकक्रियावचनात् उद्विभ्यां तपः (१,३.२७) इत्यनेन आत्मनेपदं भवति। 'स्वाङ्गकर्मकाच्चेति वक्तव्यम्' (वा.916) इति वार्तिकम्। स्वमङ्गं स्वाङ्गम् इत्येवार्थः। उत्तपते पाणिम्। उत्तपते पृष्ठम्। स्वाङ्गकर्मकाभावे तु सुवर्णम् उत्तपति इति, चैत्रो मैत्रस्य पाणिम् उत्तपति इति परस्मैपदि एव। सन्तापयति इत्यर्थः। उद्विभ्यामुपसर्गायामेव इत्यतः निष्टपति इत्यत्र आत्मनेपदं न भवति।

**उद्युङ्क्ते** - स्वराद्यन्तोपसर्गादिति वक्तव्यम् (वा 939)

**उपसेचयते** - षिच क्षरणे इत्ययं धातुः तुदादिकः सकर्मकः उभयपदी च। ण्यन्तात् सिचधातोः अनाध्याने णे रणौ यत्कर्म णौ चेत्स कर्ताऽनाध्याने (१,३.६७) इत्यनेन आत्मनेपदं विधीयते। आध्यानम् उत्कण्ठापूर्वकं स्मरणम्। अण्यन्तावस्थायाम् - उपसिञ्चन्ति हस्तिनं हस्तिपकाः, ण्यन्तावस्थायाम् - उपसेचयते हस्ती स्वयमेव। अनाध्यानाभावे अर्थात् उत्कण्ठ्ये तु स्मरति वनगुल्मं कोकिलः। स्मरयति वनगुल्मः। स्मरयति भक्तान् हरिः।

**नियुङ्क्ते** - स्वराद्यन्तोपसर्गादिति वक्तव्यम् (वा 939)

**पराजयते** - जि जये इत्ययं धातुः भ्वादिकः अकर्मकः परस्मैपदी च। परा-उपसर्गपूर्वकात् जिधातोः विपराभ्यां जेः (१,३.१९) इत्यनेन आत्मनेपदं विधीयते। अयं शेषात्कर्तरि परस्मैपदम् (१,३.७८) इत्यस्य अपवादकः। पराजयते। निकृष्टो भवतीत्यर्थः। पराजयस्व शत्रुम्। अध्ययनात् पराजयते। (पा1.4.26 सूत्रे वृत्तौ) अध्येतुं ग्लायतीत्यर्थः।

**परिमृष्यति** - मृष तितिक्षायाम् इत्ययं धातुः चुरादिकः सकर्मकः उभयपदी च। परिपूर्वकात् मृषधातोः आत्मनेपदे प्राप्ते परेर्मृषः (१,३.८२) इत्यनेन परस्मैपदं विधीयते। परिमृष्यति। परेः इत्यभावे आमृष्यते।

**प्रतिशुश्रूषते** - प्रति योगे लक्षणेत्थम्भूताख्यानभागवीप्सासु प्रतिप्रयनवः (1.4.90) इत्यनेन कर्मप्रवचनीयसंज्ञा ततः 'कर्मप्रवचनीययुक्ते द्वितीया' इति द्वितीयाविभक्तिः। तेन गुरुं प्रतिशुश्रूषते इति रूपम्।

**भुङ्क्ते** - भुज पालनाभ्यवहारयोः इत्ययं धातुः रुधादिकः सकर्मकः परस्मैपदी च। भुज धातोः अनवनार्थे भुजोऽनवने (१,३.६६) इत्यनेन आत्मनेपदं विधीयते। भुङ्क्ते। अनवन ाभावे तु भुनक्त्येनमग्निराहित ः। अनवन इति प्रतिषेधेन रौधादिकस्यैव ग्रहनम्, न तु तौदादिकस्य भुजो कौटिल्ये इत्यस्य। तेन इह न भवति, विभुजति पाणिम्॥

**विजयते** - जि जये इत्ययं धातुः भ्वादिकः अकर्मकः परस्मैपदी च। विपूर्वकात् जिधातोः विपराभ्यां जेः (१,३.१९) इत्यनेन आत्मनेपदं विधीयते। अयं शेषात्कर्तरि परस्मैपदम् (१,३.७८) इत्यस्य अपवादकः। विजयते। उत्कृष्टो भवतीत्यर्थः। विजयतां देवः।

**वितपते** - तप सन्तापे इत्ययं धातु भ्वादिकः सकर्मकः परस्मैपदी च। विपूर्वकात् तपधातोः अकर्मकक्रियावचनात् उद्विभ्यां तपः (१,३.२७) इत्यनेन आत्मनेपदं भवति। वितपते। दीप्तिमान् भवतीत्यर्थः। 'स्वाङ्गकर्मकाच्चेति वक्तव्यम्' (वा.916) इति वार्तिकम्। स्वमङ्गं स्वाङ्गम् इत्येवार्थः। वितपते पाणिम्। वितपते पृष्ठम्। स्वाङ्गकर्मकाभावे तु चैत्रो मैत्रस्य पाणिम् वितपति, देवदत्तो यज्ञदत्तस्य पृष्ठं वितपति इति परस्मैपदि एव। सन्तापयति इत्यर्थः। उद्विभ्यामुपसर्गायामेव इत्यतः निष्टपति इत्यत्र आत्मनेपदं न भवति।

**विप्रवदन्ते** - वद व्यक्तायां वाचि इत्ययं धातुः भ्वादिकः सकर्मकः परस्मैपदी च। विप्रलापात्मके व्यक्तवाचां समुच्चारणे विप्रपूर्वकात् वदधातोः विभाषा विप्रालापे (१,३.५०) इत्यनेन आत्मनेपदं विधीयते। विप्रलापः विरुद्धोक्तिः। विप्रवदन्ते वैद्याः, विप्रवदन्ति वैद्याः। विप्रवदन्ते मौहूर्ताः, विप्रवदन्ति मौहूर्ताः। युगपत्परस्परप्रतिषेधेन विरुद्धं वदन्त ीत्यर्थः। विप्रलाप ाभावे सम्प्रवदन्ते ब्राह्मणाः। व्यक्तवाच ः अभावे तु विप्रवदन्ति शकुनयः। समुच्चारणाभावे तु क्रमेण मौहूर्ता मौहूर्तेन सह विप्रवदन्ति ॥

**विस्मापयते** - ष्मिङ् ईषद्धसने इत्ययं धातुः भ्वादिकः आत्मनेपदी च। ण्यन्तात् स्मिधातोः भीस्म्येर्हेतुभये (१,३.६८) इत्यनेन आत्मनेपदं विधीयते। जटिलो विस्मापयते। मुण्डो विस्मापयते।

**संवित्ते** - विद् ज्ञाने इत्ययं धातुः अदादिकः सकर्मकः परस्मैपदी च। सम्पूर्वकात् विदधातोः अकर्मकक्रियावचनात् विदिप्रच्छिस्वरतीनामुपसङ्ख्यानम् (वा.918) इत्यनेन आत्मनेपदं विधीयते। संवित्ते

**संस्वरते** - स्वृ शब्दोपदापयोः इत्ययं धातुः भ्वादिकः अकर्मकः परस्मैपदी च। सम्पूर्वकात् स्वृधातोः अकर्मकक्रियावचनात् विदिप्रच्छिस्वरतीनामुपसङ्ख्यानम् (वा.918) इत्यनेन आत्मनेपदं विधीयते। संस्वरते।

**सङ्क्ष्णुते** - क्ष्णु तेजने इत्ययं धातुः अदादिकः सकर्मकः परस्मैपदी च। सम्पूर्वकात् क्ष्णुधातोः समः क्ष्णुवः (१,३.६५) इत्यनेन आत्मनेपदं विधीयते। सङ्क्ष्णुते शस्त्रम्।

**सङ्गच्छते** - गम्लृ गतौ इत्ययं धातुः भ्वादिकः सकर्मकः परस्मैपदी च। सम्पूर्वकात् गम्-धातोः अकर्मकक्रियावचनात् समो गम्यृच्छिभ्याम् (१,३.२९) इत्यनेन आत्मनेपदं विधीयते। सङ्गच्छते। सङ्गतं भवतीत्यर्थः।

**सङ्गिरते** - गृ निगरणे इत्ययं धातुः तुदादिकः सकर्मकः परस्मैपदी च। प्रतिज्ञाने समुपसर्गपूर्वकात् गृधातोः समः प्रतिज्ञाने (१,३.५२) इत्यनेन आत्मनेपदं विधीयते। प्रतिज्ञानमभ्युपगमः। शतं सङ्गिरते। शब्दं नित्यं सङ्गिरते। प्रतिजानीते इत्यर्थः। प्रतिज्ञान ाभावे तु सङ्गिरति ग्रासम्॥

**समियृते** - ऋ गतौ इत्ययं धातुः जुहोत्यादिकः सकर्मकः परस्मैपदी च। सम्पूर्वकात् ऋधातोः अकर्मकक्रियावचनात् अर्तिश्रुदृशिभ्यश्चेति वक्तव्यम् (वा 926) इत्यनेन आत्मनेपदं विधीयते। समियृते।
**समृच्छते** - ऋ गतिप्रापणयोः इत्ययं धातुः भ्वादिकः सकर्मकः परस्मैपदी च। सम्पूर्वकात् ऋधातोः अकर्मकक्रियावचनात् अर्तिश्रुदृशिभ्यश्चेति वक्तव्यम् (वा 926) इत्यनेन आत्मनेपदं विधीयते। समृच्छते।
**समृच्छते** - ऋच्छ गतीन्द्रियप्रलयमूर्तिभावेषु इत्ययं धातुः तुदादिकः अकर्मकः परस्मैपदी च। (ऋ गतिप्रापणयोः इति भ्वादिकः सकर्मकः परस्मैपदी धातुरपि अत्र ग्राह्यः।) सम्पूर्वकात् ऋच्छिधातोः (ऋधातोः) अकर्मकक्रियावचनात् समो गम्यृच्छिभ्याम् (१,३.२९) इत्यनेन आत्मनेपदं विधीयते। समृच्छते।
**सम्पृच्छते** - प्रच्छ ज्ञीप्सायाम् इत्ययं धातुः तुदादिकः द्विकर्मकः परस्मैपदी च। सम्पूर्वकात् प्रच्छधातोः अकर्मकक्रियावचनात् विदिप्रच्छिस्वरतीनामुपसङ्ख्यानम् (वा.918) इत्यनेन आत्मनेपदं विधीयते। सम्पृच्छते।
**सम्प्रयच्छते** - संयच्छते इति द्रष्टव्यम्।
**सुस्मूर्षते** - स्मृ चिन्तायाम् इत्ययं धातुः भ्वादिकः सकर्मकः परस्मैपदी च। सन्नन्तात् स्मृधातोः ज्ञाश्रुस्मृदृशां सनः (१,३.५७) इत्यनेन आत्मनेपदं विवक्षते। नष्टं सुस्मूर्षते। स्मर्तुमिच्छतीत्यर्थः।

### 3.3 भावः एवं नियमश्च

- उपसर्गयोगे सति केषुचित् विशिष्टार्थेषु धातोः आत्मनेपदित्वे पररस्मैपदित्वे च विपरिणामः दृश्यते। तस्मिन् विषये स्पष्टतया सोदाहरणं प्रस्तुतमस्मिन् शोधपत्रे।

### 3.4 व्यवस्थीकृतजालः एवं स्वाभावीकरणम्

संस्कृतज्ञाः स्वस्वभावबलेन एतादृसान् विपरिणामान् अवलोकितवन्तः। एतत्वैशिष्ट्यं संस्कृतज्ञानां स्वभावशात् एवंविधैः प्रकारैः प्रदर्शितत्वात् परिदृश्यमानमस्ति।

### 3.5. कर्माधारितभाषासिद्धान्तोन्मुखीकरणम्

संस्कृतज्ञानानां विचाराः निर्दिष्टाः सन्तीति कृत्वा संस्कृते उपसर्गयोगः उत्कृष्टतम इति निर्धार्यते।

### अनिशीलितग्रन्थसूची


- सिद्धान्तकौमुदी
- काशिका
- बृहदनुवादचन्द्रिका
- बृहद्धातुरूपावलिः
- प्रक्रियाकौमुदी
- रूपचन्द्रिका
- काशिकाविवरणपञ्जिका (न्यासः)
- अष्टाध्यायी-भाष्य-प्रथमावृत्तिः
- अष्टाध्यायी
- उपसर्गवृत्तिः
- संस्कृतव्याकरणम्
- महादेवभट्टस्य उपसर्गवर्गः
- शब्दकल्पद्रुमः
- उपसर्गार्थचन्द्रिका